दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् पौषशुक्लनवमी
पौषः 14 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-67
1
दिसम्बर 29, 2025
Website- www.himsanskritam.com
Email-himsanskrit@gmail.com

2 Himachal Doctor's Strike- मुख्यमन्त्री सुक्खुः विरोध-प्रदर्शनस्य समाप्त्यर्थं चिकित्सकेभ्यः आह्वानं कृतवान्

3 Children Of The States- सर्वकारस्य स्नेहेन 'राज्यस्य बालकाः' स्वलक्ष्यं प्राप्तुं जीवने अग्रे गच्छन्ति

6 २०२६ संवत्वर्षस्य भविष्यवाण्यः- उत्तराखण्ड- ज्योतिषरत्नेन आचार्येण डॉ. चण्डीप्रसाद-घिल्डियाल-दैवज्ञेन प्रकाशिताः

## सुभाषितम्

**अस्थिरः कुलसम्बन्धः,**
**सदा विद्याविवादिनी।**
**मदो मोहाय मिथ्यैव,**
**मुहूर्तनिधनं धनम्।।**
**(दर्पदलन {क्षेमेन्द्र} १/२८)**

अर्थात्- कुल-सम्बन्ध अस्थिर होता है, विद्या सदा ही विवादपूर्ण रहती है और धन क्षण-भर में नष्ट हो जाने वाला होता है, अतः इन मोहजनक वस्तुओं पर मिथ्या अहंकार ठीक नहीं है।

## मन की बात इति कार्यक्रमे प्रधानमन्त्रिणा सिन्दूराभियानं सविशेषम् उल्लेखितम्




**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् भारतेन अस्मिन् वर्षे सर्वत्र दृढ़-प्रभावः स्थापितः। मन की बात इति कार्यक्रमे प्रधानमन्त्री अवोचत् यत् राष्ट्रिय सुरक्षा-क्रीडा-विज्ञानं च प्रभृति जगतः वृहत्तममञ्चेषु भारत-जनता पञ्च-विंशत्युत्तर-द्वि-सहस्र-तमवर्षे गौरवान्विता अभवत्। तेनोक्तं यत् सिन्दूराभियानं प्रत्येकं नागरिकाय गौरवस्य प्रतीकम् अवर्तत। श्री-मोदिना वन्देमातरम् इति गीतस्य सार्धैक-शतवर्ष-पूर्ती जनानाम् उत्साहोऽपि प्रशंसितः। प्रधानमन्त्री अवोचत् यत् पञ्च-विंशत्युत्तर-द्वि-सहस्र-तमवर्षं क्रीडायै अपि स्मरणीयम् वर्तते। अस्मिन् वर्षे भारतीय पुरुषदलेन आई-सी.सी चैम्पियन्स् ट्राफी इति क्रिकेट स्पर्धा विजिता। महिलादलेन च विश्व-चषक क्रिकेट स्पर्धा विजिता। प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् विज्ञानान्तरिक्ष-क्षेत्रे अपि अस्मिन् वर्षे भारतेन महत्वपूर्णपलब्धिः प्राप्ता । ग्रुप कैप्टन सुधांशु शुक्ला प्रथमो भारतीयः संवृत्तः यो हि अन्ताराष्ट्रियान्तरिक्ष केन्द्रम् गतवान्। प्रधानमन्त्री अवोचत् यत् वर्षारम्भे प्रयागराजे महाकुम्भस्य आयोजनं जगति प्रसिद्धिम् अवाप्तवान्। निजसम्बोधने प्रधानमन्त्रिणा स्वदेशी अभियानस्य स्मार्ट इण्डिया हैकाथॉन इत्यस्य पी एम सूर्य घर इति योजनायाः च उल्लेखो विहितः। प्रधानमन्त्रिणा आगामि मासे आयोक्ष्यमाणस्य राष्ट्रिय-युव-दिवसस्य गणतन्त्रदिवसस्य चापि चर्चा कृता।

## राष्ट्रपतिः द्रापदीमुर्मुः कर्णाटकस्य करवार- नौसैन्य-स्थासने वाघशीर-सबमरीन इति जलान्तर्गामिन्याः यात्रां कृतवती

**हिमसंस्कृतवार्ताः** - राष्ट्रपतिः द्रापदीमुर्मुः कर्णाटकस्य करवार- नौसैन्य-स्थासने वाघशीर-सबमरीन इति जलान्तर्गामिन्याः यात्रां विदधाति। इयं हि कलवेरी श्रेण्याः जलान्तर्गामिनी वर्तते। यात्रावधौ नौसेना प्रमुखः एडमिरल दिनेश के. त्रिपाठी अपि राष्ट्रपतिना सह वर्तते। अयं द्वितीयः अवसरः वर्तते यदा राष्ट्रपतिना कलवेरी श्रेण्याः जलान्तर्गामिन्याः यात्रा कृतवती। इतः पूर्वं षडोत्तर-द्वि-सहस्रतमे वर्षे पूर्वराष्ट्रपतिः डा. ए.पी.जे. अब्दुल कलामवर्य अस्याः यात्रां कृतवान्। कारवारे आगमनात् प्राक् कर्नाटकस्य राज्यपालः थावरचन्द-गहलोतः राष्ट्रपत्युः स्वागतम् अकरोत्। अवधेयं यत् राष्ट्रपतिः गतदिनात् आरभ्य गोवा कर्णाटक झारखण्ड राज्यानां चतुर्दिवसीय यात्रायां वर्तते इयं यात्रा गतदिने झारखण्डतः अरब्धा।

## केन्द्रीयगृहमन्त्री अमितशाहः भारतीय-चिकित्सासङ्घेन आयोजितं आई.एम्.ए. नेटकोन् इति कार्यक्रमम् सम्बोधितवान्




**हिमसंस्कृतवार्ताः** - केन्द्रीयगृहमन्त्रिणा अमितशाहेन उक्तं यत् (आइ. एम्. ए.) इति भारतीयचिकित्सासङ्घस्य योगदानं चिकित्साक्षेत्रे सर्वाधिकं वर्तते । अहमदाबाद-नगरे भारतीय-चिकित्सासङ्घन आयोजितं विंशत्यधिकद्विसहस्रतमवर्षस्य आइ. एम्. ए. नेटकोन् इति कार्यक्रमम् सम्बोधयन् श्री शाहः अवोचत् यत् आयुष्मान भारत-योजना देशे महद् परिवर्तनम् आनयत् । गृहमन्त्री अवदत् यत् कोरोनावधौ सेवां कुर्वन्तः चिकित्सकाः रोगिभ्यः प्राथमिकताम् अयच्छन् । श्रीशाहः अहमदाबाद-नगरनिगमद्वारा निर्मितस्य जलनिर्गमन-मार्गस्य प्रथमचरणस्य सममेव एस्.जी. राजमार्गस्य प्रायोगिक-परियोजनायाः उद्घाटनमपि कृतवान् ।

## शान्ति-विधेयकं नरेन्द्रमोदिनः प्रशासनस्य बृहत्तमेषु विज्ञानपरिष्कारेषु अन्यतमम् अस्ति डॉ. जितेन्द्रसिंहः



**हिमसंस्कृतवार्ताः** - केन्द्रीय-विज्ञान-प्रौद्योगिकी-मन्त्री डॉ. जितेन्द्रसिंहः अवोचत् यत् शान्ति-विधेयकं नरेन्द्रमोदिनः प्रशासनस्य बृहत्तमेषु विज्ञानपरिष्कारेषु अन्यतमम् अस्ति । नवदेहल्यां वार्ताहरैः सह वार्तालापं कुर्वन्, श्री सिंहः अवदत् यत्, भारतस्य परमाणु ऊर्जा-क्षमता चतुर्दशाधिक-द्वि-सहस्रतमे वर्षे प्रायः चतुःदशांशः चतुःगीगावाट् परिमितासीत्। अष्ट दशांशः सप्त गीगावाट् परिमित-पर्यन्ता द्विगुणिता अभवत्। केन्द्रीयमन्त्री अवदत् यत्, शान्ति-विधेयकं भारतस्य परमाणुक्षेत्रे ऐतिहासिकं परिष्कारं निर्दिशति, येन सुरक्षायाः सार्वभौमत्वस्य, सार्वजनिक हितस्य च असम्बद्धान् मानदण्डान् अवलम्ब्य शान्तिपूर्ण, स्वच्छं, सुस्थिरं च ऊर्जायाः क्षेत्राणि उद्घाट्यन्ते । सः एतदपि प्रख्यापितवान् यत् प्रधानमन्त्री-नरेन्द्र-मोदी-वर्यस्य तृतीयः कार्यकालः साहसिक संरचनात्मक-परिष्कारैः स्पष्टतया लक्षितः, यत्र हि विज्ञानाय, नवान्वेषणाय, उद्यमशीलतायै च अविरतं महत्त्वं दीयते।

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## महिलानां क्रिकेट्-क्रीडायां भारत-श्रीलङ्कादलयोः विंशतिं प्रतिविंशतिः स्पर्धामालिकायां चतुर्थी स्पर्धा भारतेन विजिता



**हिमसंस्कृतवार्ताः** - महिलानां क्रिकेट्-क्रीडायां भारत-श्रीलङ्कादलयोः विंशतिं प्रतिविंशतिः स्पर्धामालिकायां चतुर्थी स्पर्धा भारतेन त्रिंशत् धावनांकैः विजिता । भारतीय समयानुसारेण इयं स्पर्धा सायं सप्तवादने केरलस्य तिरुवनन्त-पुरमस्थिते ग्रीनफिल्ड क्रीडाङ्गणे अभवत्। ध्यातव्यं वर्तते यत् अस्याः शृङ्खलायाः चतस्रः एव स्पर्धाः भारतेन विजिताः अस्ति। अधुना शृङ्खलायाः अन्तिमा स्पर्धा मङ्गलवासरे भविष्यति ।

# Himachal Doctor's Strike- मुख्यमन्त्री सुक्खुः विरोध-प्रदर्शनस्य समाप्त्यर्थं चिकित्सकेभ्यः आह्वानं कृतवान्



**हिमसंस्कृतवार्ताः- शिमला।** इन्दिरागान्धी चिकित्सामहाविद्यालये (आईजीएमसी) आक्रमणघटनायाः अनन्तरं वरिष्ठनिवासिनः डॉ. राघवनारुला इत्यस्य निष्कासनस्य विरोधार्थं रविवासरे हिमाचलप्रदेशस्य चिकित्सकाः विरोध-प्रदर्शनं निरन्तरं कृतवन्तः। रविवासरे आईजीएमसी-संस्थानस्य अटल-सभाशालायाः बैडमिण्टनभवने चिकित्साशास्त्रस्य छात्राः वैद्याः च एकत्रिताः भूत्वा वैद्यस्य निष्कासनस्य अन्यायः इति निन्दां कृत्वा राज्यसर्वकारस्य एकपक्षीयकार्याणां न्यायस्य आग्रहं कृतवन्तः। इदानीं मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः चिकित्सकानाम् आह्वानं कृतवान् यत् ते विरोधप्रदर्शनं समाप्तं कृत्वा सोमवासरे कार्ये पुनः आगच्छन्तु। सः अवदत् यत् सः आईजीएमसी- संस्थानस्य वरिष्ठवैद्यैः सह विरोधप्रदर्शनस्य विषये चर्चां करिष्यति, सम्यक् अन्वेषणं कृत्वा निर्णयस्य समीक्षा भविष्यति इति। चिकित्सामहाविद्यालयेषु निवासीवैद्यैः सह हिमाचलचिकित्साधिकारिसङ्घः अपि विरोधप्रदर्शनं कुर्वन् अस्ति, सेमडिकोट आन्दोलनस्य समर्थनं कुर्वन् अस्ति। अस्य कारणात् शनिवासरे राज्ये सर्वेषु चिकित्सामहाविद्यालयेषु, अञ्चलचिकित्सालयेषु, सीएचसी पीएचसी-इत्येतेषु च स्वास्थ्यसेवाः प्रभाविताः अभवन्।

अनेकस्थानेषु ओपीडी-मध्ये रोगिणां परीक्षणं कर्तुं न शक्यते स्म, अनेके शल्यक्रियाः अपि न कृताः। चिकित्सालये रोगिणः दुःखिताः एव आसन्। दूरस्थस्थानात् आगच्छन्तः रोगिणः परिचारकाः च कष्टानां सम्मुखीकरणं कुर्वन्ति स्म। यद्यपि बहिः रोगीविभागे वरिष्ठवैद्याः सेवां ददति स्म तथापि रोगिणः घण्टाभिः प्रतीक्षां कर्तुं प्रवृत्ताः आसन्। इदानीं चिकित्सालयेषु आपत्कालीनसेवानां सुव्यवस्थितीकरणाय सर्वकारेण मानकसञ्चालनप्रक्रियाः (SOPs) प्रकाशिताः। प्राचार्याणां, अतिरिक्तनिदेशकानां, वरिष्ठचिकित्साधीक्षकाणां अवकाशः स्थगितः। तेभ्यः चिकित्सालये उपस्थितः भवितुं कथितम्। वरिष्ठविशेषज्ञवैद्याः (परामर्शदातारः) बहिः रोगीविभागेषु (ओपीडी) उपस्थिताः भवेयुः इति निर्देशः दत्तः अस्ति। इदानीं विरोध-प्रदर्शनं कुर्वन्तः वैद्याः शनिवासरे डॉ. राघव नरुला इत्यस्य निष्कासननिर्णयस्य विपर्ययस्य कृते अडिगाः एव आसन्।

चिकित्साशिक्षासंशोधननिदेशालयेन (डीएमईआर) निर्गतानाम् एसओपी- अन्तर्गतम् आपत्कालीनसेवाः पूर्णतया कार्यरताः एव भविष्यन्ति। कनिष्ठ-वरिष्ठनिवासिनः संकायः च २४ होराः उपलभ्यन्ते। बहिर्रोगी-वार्डसेवानां कृते बहिर्रोगीविभागेषु (ओपीडी) परामर्शदातृवैद्यानाम् उपस्थितिः आवश्यकी भविष्यति। प्रवेशितरोगिणः प्राधान्यं दीयते। नित्यं वार्डपरिक्रमणं अनिवार्यं कृतम्। शल्यक्रियागृहेषु नियमितकार्यक्रमाः स्थगिताः भविष्यन्ति; केवलं आपत्कालीनकार्यक्रमाः एव क्रियन्ते।

आपत्कालीन- आन्तरिक- रोगीपरिचर्यायै एक्स-रे, अल्ट्रासाउण्ड, सीटीस्कैन, एमआरई इत्यादीनां रेडियोलॉजी- सेवानां प्राथमिकता भविष्यति। प्रयोगशालासेवाः, यथा विकृतिविज्ञानं, जैवरसायनशास्त्रं, सूक्ष्मजीवविज्ञानप्रयोगशालाः च अव्यवधानं कार्यं करिष्यन्ति। शैक्षणिकक्रियाकलापाः कस्यापि परिस्थितौ प्रभाविताः न भवेयुः। एमबीबीएस-छात्राणाम् अध्ययनं, प्रशिक्षणं, परीक्षा च निरन्तरं भविष्यति। सर्वेभ्यः विभागप्रमुखेभ्यः ओपीडी, आईपीडी, आपत्कालीनसेवानां कृते परामर्शकर्तव्यरोस्टरं सज्जीकर्तुं निर्देशः दत्तः। चिकित्सामहाविद्यालयानां प्राचार्याणां, अतिरिक्तनिदेशकानां, चिकित्सा-अधीक्षकाणां च कृते आदेशः दत्तः यत् ते अस्मिन् काले महाविद्यालयेषु अवकाशं न गृह्णीयुः, उपलभ्यन्ते च। प्राचार्याः प्रतिदिनं सायं ४ वादने सर्वैः विभागप्रमुखैः सह स्थितिसमीक्षां करिष्यन्ति। आपत्कालीनचिकित्साविभागाय (DMER) प्रतिवेदनं प्रस्तौति। एतेषां निर्देशानाम् अवज्ञां कृत्वा अथवा आवश्यकसेवानां बाधां कृत्वा नियमानाम् अन्तर्गतम् अनुशासनात्मकं कार्यविधिः भविष्यति। स्वास्थ्यसेवानिदेशकः डॉ. गोपालबेरी इत्यनेन आपत्कालीनसेवाः प्रभाविताः न भविष्यन्ति इति उक्तवान्। आन्दोलनस्य स्थितिः, रोगिषु प्रभावः च इति विषये सर्वेभ्यः चिकित्सालयेभ्यः प्रतिवेदनानि प्राप्तानि सन्ति।

## विरोध-प्रदर्शनम् अनुचितम्, प्रत्येकस्य चिकित्सासंस्थानस्य प्रतिवेदनं सज्जं भवति- कर्नलः धनीरामशाण्डिलः

स्वास्थ्यमन्त्री धनीरामशाण्डिलः अवदत् यत् वैद्याः विरोधप्रदर्शनं न कुर्वन्तु। वैद्याः प्रभावं जनयितुं एवम् कुर्वन्ति स्यात्। सः कस्यचित् सेवायाः, चरितस्य वा विरुद्धः नास्ति। जनानां स्वास्थ्यं सुनिश्चित्य तस्य दायित्वं वर्तते। स्वास्थ्यमन्त्री स्वास्थ्यसेवानिदेशकात् प्रतिक्रियाम् अवाप्तवान्। आपत्कालीनसेवासु कोऽपि प्रभावः न भविष्यति इति सः अवदत्। प्रत्येकं स्वास्थ्यसंस्था प्रतिदिनं कति वैद्याः कार्यं कुर्वन्ति, के कार्यं न कुर्वन्ति इति विस्तरेण प्रतिवेदनं निर्मास्यति। आपत्कालीनसेवासु प्रमादः न सह्यते। सः स्वयमेव दिल्लीतः प्रत्यागत्य वैद्यानां मुख्यमन्त्रिणां च मध्ये मेलनस्य व्यवस्थां करिष्यति। सः स्वयमेव मन्यते यत् यदि ते शान्ततया आगत्य क्षमायाचनां कृतवन्तः स्यात् तर्हि विषयस्य समाधानं भवितुम् अर्हति स्म।

## आईजीएमसी इत्यत्र चिकित्सकाः विरोधं कुर्वन्ति-

अनिश्चितकालं यावत् आन्दोलनं कुर्वन्तः निवासीवैद्याः, प्रशिक्षुणः, चिकित्साछात्राः च शनिवासरे मध्याह्न १२ वादने अटलसभागभवनस्य बैडमिण्टनप्राङ्गणे निष्कासितस्य वैद्यस्य पुनर्स्थापनस्य आग्रहं कृतवन्तः। आरडीए- सङ्घस्य नेतृत्वे एकत्रिताः एते शतशः वैद्याः वयं न्यायमिच्छामः (We want justice...,) आदरं यच्छन्तु सेवां स्वीकुर्वन्तु (Give respect, take services...) इति घोषान् उद्घोषयन्ति स्म।

# कालका-शिमला रेलमार्गे अद्य आरभ्य २८ फ़रबरीपर्यन्तम् अवकाश- विशेषरेलयानस्य सञ्चालनम्, पर्यटकानां लाभः



**हिमसंस्कृतवार्ताः- डॉ. पद्मनाभः, शिमला** ।विश्वधरोहर- कालका- शिमला- रेलमार्गे नववर्षे अवकाशकाले च यात्रिकाणां आरक्षणवृद्धिं दृष्ट्वा रेलमण्डलेन अवकाश-विशेषरेलयानं चालयितुं निर्णयः कृतः। एतद् विशेषरेलयानं रविवासरे कालकातः शिमलां प्रति तथा शिमलातः कालकां प्रति च धाविष्यति। एतद् रेलयानं २८ फरवरीपर्यन्तं चालयिष्यते। अनेन पर्यटकानां प्रत्यक्षः लाभः भविष्यति। अस्मिन् विशेषरेलयाने रेलमण्डलेन आन्तर्जालिकम् आरक्षणस्य सुविधाऽपि प्रदत्ता अस्ति। किन्तु अस्मिन् वर्षे सामान्य-यात्रापत्रस्य व्यवस्था न भविष्यति। अवकाशविशेष- ०४५०३ रेलयानं मध्याह्ने १२:३० वादने कालकातः शिमलां प्रति प्रस्थानं करिष्यति। अस्य धर्मपुरे, बडोगे, सोलने, कण्डाघाटे च विरामस्थानानि सन्ति। अतिरिक्तरूपेण कालकातः शिमलां गच्छतः कनोहे, शोघी, समरहिले च रेलयान- क्रॉसिङ्गार्थं दश-दश-निमेषपर्यन्तं स्थगनं भविष्यति।

अवकाशविशेष- ०४५०४ रेलयानं रात्रौ ८:२० वादने शिमलातः कालकां प्रति आगमिष्यति। एतद् रेलयानं कण्डाघाटे न स्थास्यति, अन्ये विरामस्थानानि यथावत् भविष्यन्ति। एतद् रेलयानं रात्रौ प्रायः १:१० वादने कालका- रेलस्थानके प्राप्स्यति। रेलमण्डलेन अस्य विषये अधिसूचना निर्गता अस्ति, स्थानकानामपि सूचनाः प्रदत्ताः सन्ति। उल्लेखनीयं यत् आगामिदिनेषु नववर्षे जनवरीमासे च अवकाशेषु प्रदेशे पर्यटकानां संख्या वर्धिष्यते। अद्य एव १० जनवरीपर्यन्तं चलन्ती रेलयानानि पूर्णतया आरक्षिताणि सन्ति, दीर्घा प्रतीक्षासूची अपि वर्तते। एते पर्यटकाः रविवासरात् संबलं प्राप्स्यन्ति। रेलयानस्य सञ्चालनात् अद्य कालका- शिमला मार्गे षट् रेलयानानि प्रतिदिनं आरोह-अवरोहं कुर्वन्ति। तेन सह एकं यात्रिक-रेलयानं अपि एकस्मिन् दिने आरोह-दिशायां, अपरस्मिन् दिने अवरोह-दिशायां च चालयते। अवकाश-विशेषे ईवी-कोचस्य भाटकं ९५० रूप्यकाणि, प्रथमश्रेण्याः ७९५ रूप्यकाणि, द्वितीयश्रेण्याः ८० रूप्यकाणि निश्चितानि सन्ति। रविवासरे अप्रत्यन्तर्जालिकं यात्रापत्राणि उपलब्धानि भविष्यन्ति, ततः परम् आन्तर्जालिकम् आरक्षणं शक्यं भविष्यति।

***कालका-शिमला-रेलखण्डे आरक्षणसंख्या निरन्तरं वर्धते। ताम् अवलोक्य अवकाश-विशेष-रेलयानं चालयितुं निर्णयः कृतः। एतद् रेलयानं २८ फरवरीपर्यन्तं धाविष्यति। विशेषरेलयानस्य सञ्चालनात् यात्रिकाणां, विशेषतः पर्यटकानां, लाभः भविष्यति।***

**विनोद भाटिया,**
**वरिष्ठ- मण्डल- वाणिज्यकप्रबन्धकः, अम्बाला।**

# Children Of The States- सर्वकारस्य स्नेहेन 'राज्यस्य बालकाः' स्वलक्ष्यं प्राप्तुं जीवने अग्रे गच्छन्ति



**हिमसंस्कृतवार्ताः- शिमला।**
राज्यसर्वकारेण मातापितृप्रेम्णः सामाजिकसुरक्षायाः, अवसरेभ्यः च वंचिताः बालकाः 'राज्यस्य बालकाः' इति दत्तकं स्वीकृत्य जीवने प्रगतेः प्रेम्णः, परिचर्यायाः च अवसराः प्रदत्ताः। मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः इत्यस्य नेतृत्वे मानवीयपद्धतिं स्वीकृत्य विपन्नजनानाम् कल्याणाय सर्वकारः प्रमुखतया कार्यं कुर्वन् अस्ति। एतदर्थं राज्यसर्वकारेण अनाथबालानां, निराश्रयाणां महिलानां, वृद्धानां च समर्थनार्थं मुख्यमन्त्री सुख-आश्रययोजना आरब्धा अस्ति। अस्याः योजनायाः अन्तर्गतं प्रायः ६,००० बालकाः 'राज्यस्य बालकाः' इति दत्तकं गृहीताः सन्ति। अनाथबालानां पोषणार्थं विधानम् अङ्गीकृत्य हिमाचलप्रदेशः देशस्य प्रथमं राज्यं जातम्।
राज्यसर्वकारः एतेषां बालकानां कृते २७ वर्षपर्यन्तं निःशुल्कशिक्षां प्रददाति, यत्र उच्चशिक्षायाः कौशलविकासस्य च अवसराः सन्ति। तदतिरिक्तं एते बालकाः उद्यमशीलतासमर्थनं, आवाससहायता, प्रशिक्षणं, पञ्चतारकवासस्थानं च प्राप्नुवन्ति, यत्र गोवा, अमृतसरं, दिल्लीं च प्रति रेलयानं विमानयात्रा च, एक्सपोजर- भ्रमणं च भवति राज्यसर्वकारेण ३७१ छात्राणां कृते उच्चशिक्षायाः, छात्रावासशुल्कस्य, शिक्षणशुल्कस्य च कृते ₹१.५३ कोटिरूप्यकाणां शैक्षिकसहायता प्रदत्ता, २३८ लाभार्थिनः व्यावसायिकप्रशिक्षणं प्राप्तवन्तः प्रशिक्षणं, कौशलविकासानुदानं, व्यावसायिकप्रशिक्षणकार्यक्रमाः च अद्यतनजीविकापरिदृश्ये आत्मविश्वासेन प्रतिस्पर्धां कर्तुं युनः लाभार्थिनः अधिकं सशक्ताः अभवन्। शिक्षायाः अतिरिक्तं सुख-आश्रययोजनायाः अन्तर्गतं लाभार्थीनां सामाजिकसुरक्षायाः विषये राज्यसर्वकारेण समग्रदृष्टिकोणं स्वीकृतम् अस्ति। विगतत्रिवर्षेषु विभिन्नकल्याणकारीपरिकल्पनानां अन्तर्गतं लाभार्थिभ्यः ₹२८ कोटिरूप्यकाणां सहायता प्रदत्ता। तदतिरिक्तं २,६३५ बालकानां कृते वस्त्रवृत्तिः, ३,२६८ बालकानां कृते उत्सववृत्तिः, २,४७१ बालकानां कृते पोषणवृत्तिः, स्टार्टअप आरम्भार्थं सहायता च प्रदत्ता अस्ति। २६४ लाभार्थिभ्यः ₹५.१६ कोटिरूप्यकाणां विवाहानुदानं अपि प्रदत्तम् अस्ति।
उद्यमशीलतां प्रवर्धयितुं राज्यसर्वकारेण ७५ युनां कृते ₹६५.३६ लक्षरूप्यकाणां आर्थिकसहायता प्रदत्ता, येन ते स्वव्यापारं आरभ्य आत्मनिर्भरतां प्राप्तुं शक्नुवन्ति। राज्यसर्वकारेण ४२३ लाभार्थिभ्यः आवासनिर्माणसहायता प्रदत्ता, पात्रव्यक्तिभ्यः भूमिः आवंटिता च। तदतिरिक्तं मुख्यमन्त्री विधवा एकलमहिला आवासयोजनायाः अन्तर्गतं २६ लाभार्थिभ्यः ₹३ लक्षरूप्यकाणाम् आर्थिकसहायता प्रदत्ता अस्ति, येन कुलवितरितराशिः ₹७८ लक्षं भवति।इन्दिरागांधी-सुखशिक्षा-योजनायाः अन्तर्गतं १९,४७९ बालकाः ४५३ युनः च उच्चशिक्षां कुर्वन्तः सन्ति। राज्यसर्वकारः एतेभ्यः बालकेभ्यः प्रतिमासं ₹१,००० इत्येव सहायतां प्रदाति। मुख्यमन्त्री सुखाश्रययोजनया अनाथबालानां, दुर्बलबालानां च जीवने नूतनयुगस्य आरम्भः अभवत्। एतेन योजनायाः कृते सर्वकारः संवेदनशीलतया समावेशेण च सह कथं कार्यं कर्तुं शक्नोति इति प्रदर्शितवती अस्ति। भविष्ये एषा योजना अधिकाधिकबालानां जीवने सकारात्मकपरिवर्तनं करिष्यति।

# प्रधानमन्त्री नरेन्द्रमोदी पञ्चम-मुख्यसचिवानां सम्मेलनस्य अध्यक्षतामकरोत्




**हिमसंस्कृतवार्ताः** -प्रधानमन्त्री नरेन्द्रमोदी राजधान्यां नवदेहल्यां पञ्चम-मुख्यसचिवानां सम्मेलनस्य अध्यक्षताम् अकरोत् । इदं त्रिदिवसीयं सम्मेलनम् गुरुवासरे आरब्धम् । अस्योद्देश्यं राष्ट्रिय-विकास-प्राथमिकतासु निरन्तर-संवाद-मध्यमेन केन्द्र-राज्ययोः सहभागितायाः दृढीकरणं वर्तते। इदं सम्मेलनं प्रधामन्त्रिणः नरेन्द्रमोदिनः सहयोगपूर्ण सङ्घवादस्य दृष्टेः अनुरूपं तादृशः मञ्चः वर्तते यत्र केन्द्र राज्यानि च समावेशि-भविष्यनुरूपम् आर्थिक-वृद्ध्यै मानवानां क्षमतायाः सर्वोत्तमोपयोगस्य रूपरेखां निर्धारयन्ति। अस्य सम्मेलनस्य विषयः विकसितभारताय मानव सम्पत्तिः वर्तते। सम्मेलने राज्यानां केन्द्रशसित प्रदेशनां च सर्वोत्तमाः कार्यपद्धतयः परस्परं सहक्रियन्ते। सम्मेलनस्य अन्तर्गतं बालशिक्षा-विद्यालय-शिक्षा कोशल विकासः उच्चशिक्षा क्रीडा पाठ्येतर गतिविधयः च पञ्च-महत्त्वपूर्णानि क्षेत्राणि सन्ति।

# मुख्यनिर्वाचनायुक्तः ज्ञानेश-कुमारः निर्वाचन-प्रक्रियायाः विविध-विषयेषु चर्चायै अद्य भुवनेश्वरनगरे मतदानकेन्द्र-स्तराधिकारिभिः सह मेलिष्यति

**हिमसंस्कृतवार्ताः** - मुख्यनिर्वाचनायुक्तः ज्ञानेश-कुमारः निर्वाचनप्रक्रियायाः विविध-विषयेषु चर्चायै अद्य भुवनेश्वरनगरे मतदानकेन्द्र-स्तराधिकारिभिः सह मेलिष्यति। ओडिशाराज्यस्य खोरधा-कटकजनपदयोः प्रायः अष्टशताधिकारिणः अस्मिन् सम्मेलने भागं भजिष्यन्ति । तत्र तावत् निर्वाचन-सूच्याः सत्यापने तेषां महत्त्वपूर्ण भूमिकायां ध्यानं केन्द्रितं भविष्यति। मुख्यनिर्वाचनायुक्तः वरिष्ठ-राज्य-निर्वाचनाधिकारिभिः सहापि उपवेशनानि करिष्यति, येन कार्य-सज्जतायाः समीक्षा भवेत्। मतदातृ-सेवा-प्रबन्धनस्य समाह्वानानां च समाधानं सम्पद्येत । एषा यात्रा ओडिशाराज्ये निर्वाचन-सूच्याः विशेष-गहन-पुनरीक्षणस्य तृतीय-चरणस्य आरम्भात् पूर्वं पूर्वाभास-रूपेण अवलोक्यते । अस्यां प्रक्रियायां प्रतिगृहं सत्यापनं भविष्यति, यस्य उद्देश्यं दोषयुक्त-प्रविष्टयः निरस्य दोषरहितायाः मतदातृ-सूच्याः सुनिश्चयः वर्तते। मुख्य-निर्वाचनायुक्तः, गतदिनादारभ्य ओडिशाराज्यस्य त्रिदिवसीय यात्रायामस्ति, तेन पुरी-जनपदस्य रघुराजपुरग्रामस्य अवलोकनं कृतम्। अयं ग्रामः पट्टचित्र कलायाः कृते सुप्रसिद्धः अस्ति।

# काङ्ड़ाकेन्द्रीयसहकारीवित्तकोषस्य पूर्वप्रबन्धनिदेशकस्य अष्टानां अधिकारिणां च विरुद्धं प्राथमिकी पञ्जीकृता

हिमसंस्कृतवार्ताः - ऊना। काङ्गड़ाकेन्द्रीयसहकारीवित्तकोषः (केसीसीबी) इत्यनेन सह सम्बद्धे अत्यन्तं प्रचारिते होटेल् ऋणप्रकरणे वित्तकोषस्य पूर्वप्रबन्धनिदेशकस्य विनोदकुमारस्य अन्येषां च अष्टानां अधिकारिणां कर्मचारिणां च विरुद्धं प्राथमिकी पञ्जीकृता अस्ति। मण्डीजनपदस्य राजगढ़क्षेत्रस्य ग्राम भूरा इत्यस्य निवासी पूरणचन्दस्य पुत्रः युद्धचंद बैंसः इत्यस्य उपालम्भस्य आधारे पुलिसस्थानके सदर ऊनायां प्राथमिकी पञ्जीकृता अस्ति।
प्राथमिकी-अनुसारेण उपालम्भकर्ता प्रमुखः होटेल-वाहकः अस्ति तथा च मेसर्स होटेल् लेक पैलेस्, विला नलसर मोहल्ला, तहसील बल्हः, जिला मण्डी, तथा च मेसर्स हिमालयन स्नो विलेज्, मनाली इत्यस्य स्वामी अस्ति। २०१६ तमे वर्षे उपालम्भकर्ता होटेलपरियोजनायै काङ्गड़ा केन्द्रीयसहकारीवित्तकोषः लिमिटेड्, ऊना इत्यस्मात् प्रायः ₹१२ कोटिरुप्यकाणाम् अवधिक्रणं प्राप्तम् ऋणस्य प्रतिभूतिरूपेण होटेलसम्पत्तौ उभयम् अपि वित्तकोषाय बन्धकरूपेण स्थापितं आसीत् । ऋणस्य अनुमोदनस्य अभावेऽपि पूर्णराशिः समये एव न मुक्ता, अनियमितविलम्बितवितरणस्य कारणेन होटेलपरियोजनायाः महती हानिः अभवत् उपालम्भकर्तुः मते परियोजनायाः कुलम् अनुमानितव्ययः प्रायः ₹२४० कोटिः आसीत्, परन्तु वित्तकोषेण कृतानि कथितानि कार्याणि परियोजनायाः प्रभावं कृतवन्तः।आरोपः अस्ति यत् बैंक-अधिकारिणः बंधक-सम्पत्त्याः आरक्षित-मूल्यं निर्धारयितुं सम्बद्धानि मूल्याङ्कन-अभिलेखानि मिथ्याकृतवन्तः, महत्त्वपूर्णानि कार्यालय-टिप्पण्यः अपसारितवन्तः, कतिपयानि पृष्ठानि च ज्ञात्वैव विलोपितवन्तः एते अभिलेखाः वित्तकोषस्य निग्रहे आसन्, तेषां अन्तर्धानस्य उत्तरदायी बैंकाधिकारिणः एव सन्ति ।

# गोरक्षनाथ-राजकीय-संस्कृत-महाविद्यालयः नाहनम् एवञ्च भारतीयभाषासमितिः, नवदेहली इत्यनयोः संयुक्ततत्त्वावधाने सञ्चाल्यमाना द्विदिवसीया संस्कृत-कार्यशाला सफलतया सम्पन्ना





**हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः** । गोरक्षनाथ-राजकीय-संस्कृत-महाविद्यालयः नाहनम् एवञ्च भारतीयभाषासमितिः, नवदेहली इत्यनयोः संयुक्ततत्त्वावधाने सञ्चालयमाना द्विदिवसीया संस्कृत-कार्यशाला सफलतया सम्पन्ना । अस्याः कार्यशालायाः विषयः आसीत् — “सरलमानकसंस्कृतम्” (Sarala Manaka Sanskritam)

अस्याः कार्यशालायाः प्रमुखोद्देश्यः संस्कृतभाषायाः शिक्षणं सरलतया, रुचिकरतया तथा व्यवहारिकविधिभिः करणम् आसीत् । अस्यां कार्यशालायां हिमाचलप्रदेशस्य विविधविद्यालयेभ्यः आगताः त्रयोदश (१३) संस्कृताध्यापकाः , उपाधि एवं संस्कृतमहाविद्यालयानां विद्वांसः आचार्याः, प्राध्यापकाः, प्रशिक्षकाः छात्राः च सम्मानितरूपेण उपस्थिताः आसन्। कार्यशालायाः संयोजकः डॉ. ज्ञानेश्वरशर्मा आसीत् । द्विदिवसीय-कार्यशालायाः उद्घाटनसत्रं शनिवासरे अभवत्। यस्मिन् मुख्यवक्ता - श्री नरेन्द्रकुमारः, क्षेत्रसङ्घटनमन्त्री, संस्कृतभारती, उत्तरक्षेत्रम् आसीत्, येन प्रेरणादायकं उद्बोधनं प्रदत्तम्। सारस्वतातिथिः - डा. राजेशशर्मा , प्राचार्यचरः, रा.उपाधिमहाविद्यालयः, धर्मशाला आसीत्, आध्यक्ष्यञ्च डा. गिरिराजशर्मा सेवानिवृत्तः आचार्यः गोरक्षनाथ-राजकीयसंस्कृतमहाविद्यालयः, नाहनम् कृतवान् । द्वितीये दिने कार्यशालायाः सम्पूर्तिसत्रे मुख्यवक्ता – आचार्य महेश्वरदत्तशर्मा, संस्कृतप्राध्यापकः, आदर्शविद्यालयः, हिमाचलप्रदेशविश्वविद्यालयः, शिमला आसीत्, आध्यक्ष्यञ्च डॉ जगतरामशास्त्री, सेवानिवृत्तः संस्कृताध्यापकः, सारस्वतातिथिः - डा. सत्यदेवः शिक्षाशास्त्रविभागाध्यक्षः, केन्द्रीयसंस्कृतविश्वविद्यालयः, बलाहरः आसीत् । कार्यशालाकाले संस्कृतशिक्षणे नवाचाराः, संवादात्मकशिक्षणपद्धतयः, क्रियाधारितशिक्षणम्, प्रयोगात्मकाभ्यास्य च विषये विस्तृतः विचारविनिमयः अभवत्।

अध्यापकानां परस्परसंवादः, अनुभवविनिमयः, सहयोगात्मकवातावरणं च अस्य आयोजनस्य शैक्षिकमहोत्सवरूपं प्राददात्। एषा कार्यशाला न केवलं संस्कृतशिक्षणस्य नूतनां दिशां प्रदत्तवती, अपि तु संस्कृतभाषायाः प्रचार-प्रसारे सर्वेषां शिक्षकेभ्यः प्रेरणास्रोतः अपि अभवत्।

प्राप्तप्रशिक्षणस्य आधारेण स्वस्वविद्यालयेषु शिक्षणे नवाचारान् आनयितुं सर्वैः सहभागिभिः संकल्पः कृतः। अस्याः कार्यशालायाः समापनसत्रे गोरक्षनाथ-राजकीय-संस्कृत-महाविद्यालय-नाहनस्य प्राचार्यः ओंकारचन्दः सर्वेषाम् समागतानां अतिथिनां शिक्षकाणाम् छात्रा मां धन्यवादः कृतवान् । एतदतिरिक्तं विशेषतः डॉ सोमदत्तशर्मा, डॉ मुकेशकुमारः, डॉ जयकृष्णशर्मा, डॉ बलवीर सिंह, डॉ लोकपालः, ताराचंदः, नीरजामहोदया इत्यादयः उपस्थिताः आसन् ।

# महामनामालवीयजयन्त्यवसरे "विमलकीर्ति महामना" इति पुस्तकस्य लोकार्पणम्




## महामनापरिवार- झारखण्डस्य तत्त्वावधानेन पी. के. रॉय मेमोरियल महाविद्यालयस्य प्राङ्गणे भारतरत्न- महामना- पण्डित- मदनमोहन- मालवीयस्य १६४ तमी जयन्ती ‘पुरातनच्छात्रसमागमः’ च अत्यन्तं सोल्लासं सोत्साहं च समायोजितः।

**हिमसंस्कृतवार्ताः- डॉ. मूलचन्द्रशुक्लः, धनबादं, झारखण्डम्।**

कार्यक्रमस्य शुभारम्भः अतिथिभिः सरस्वत्याः दीपप्रज्वालनेन, माल्यार्पणेन च जातः। विद्यार्थिभिः मङ्गलाचरणेन स्वागतगानेन काशी हिन्दू विश्वविद्यालयस्य सुललितकुलगीतगानेन च वातावरणं मन्त्रमुग्धं विहितम्। सर्वप्रथमम् अतिथीनां वचसा स्वागतपुरस्सरं कार्यक्रमसंयोजकेन डॉ. विमलेन्दुकुमारत्रिपाठिना भारतरत्न महामना पण्डित मदनमोहन- मालवीय- जयन्ती, पुरातनच्छात्रसङ्गमश्चेत्युभयोः सम्बन्धे प्रास्ताविकी पुरस्कृता। अस्मिन्नवसरे मुख्यातिथिः डॉ. रामकुमारसिंहः (कुलपतिः, वि. वि. म. को. वि. वि.) मञ्चासीनाः आसन्। स्वकीयसम्बोधने तेनोक्तं यत् मालवीयजी महोदयानां शुचिता चरित्रज्ञानस्य महत्त्वमित्यस्य तत्कालीन- पारतन्त्र्य- काले शिक्षायाः अनिवार्यतायाश्च विषये तस्य दूरदर्शिता विशेषतः प्रदर्शिता। तेन काशी- हिन्दू- विश्वविद्यालयस्य निर्माणे मालवीयस्य 'भागीरथप्रयत्नस्य' अपि चर्चा कृता।

विशिष्टातिथिरूपेण विनोबाभावे- विश्वविद्यालयस्य (हजारीबाग) जन्तुविज्ञान-विभागाध्यक्षः उपस्थितः आसीत्। तेन छात्रान् प्रोत्सह्य मालवीयस्य संयमब्रह्मचर्ययोः सन्देशः विश्वे प्रसारयितुम् आह्वानं पुरस्कृतम्। अपरः विशिष्टातिथिः प्रो. मृत्युञ्जयकुमार सिंहः पदस्य अहङ्कारं त्यक्त्वा मालवीयस्य उदात्तशिक्षाणाम् अनुसरणाय बलं दत्तवान्।

सारस्वतातिथिः रामगढ़- महाविद्यालयस्य प्राचार्या डॉ. रत्ना पाण्डेया मालवीयस्य आदर्शान् पाल्यमानानां गुरूणां संस्मरणानि श्रावितवती। कार्यक्रमस्य सञ्चालकः डॉ. शशिकान्त तिवारी ‘शशिधरः’ मालवीयस्य जीवनेन प्रेरितान् अनेकान् प्रसङ्गान् वर्णितवान्। कार्यक्रमस्य संरक्षकेण राष्ट्रपत्यादिविविधसम्मानसभाजितेन प्रो. कृष्णकान्तशर्ममहोदयेन प्रोक्तं यत् मानवः स्वकीय- आचरणेनैव आदर्शान् संस्थापयेत्।यदा तेषां स्वास्थ्यं दृष्ट्वा उपविश्य वक्तुं निवेदितम्,तदा तैरुक्तं यत्- "यावत् शक्तिः वर्ते,तावदुत्थायैव वक्तव्यम्।" अग्रे तेनोक्तं यत् विश्वविद्यालयस्य अर्धचन्द्राकारस्य प्रतीके 'स्थायित्वम्' दरीदृश्यते।

## ग्रन्थविमोचनम्-

अस्मिन्नवसरे डॉ. विमलेन्दुकुमार त्रिपाठिमहोदयेन सम्पादितस्य ‘विमलकीर्ति महामना’ इत्याख्यस्य पुस्तकस्य लोकार्पणं विद्वद्भिः विहितम्। महामना पण्डित- मदनमोहनमालवीयविषयकाः विदुषां चतुर्विंशतिर्लेखाः अत्र पुरस्कृतास्सन्ति। अस्य सम्पादनं महामनापरिवार-झारखण्डस्य संयोजकेन डॉ. विमलेन्दुकुमारत्रिपाठिना कृतम्। प्रकाशनञ्च प्रत्नकीर्ति- प्राच्य- शोध- संस्थानेन वाराणसीस्थेन जातम्।

## सांस्कृतिकसन्ध्याः-

द्वितीयसत्रे मालवीयसम्बन्धिभजन-सन्ध्यायाः आयोजनं कृतम्, यत्र कनकझा आनन्दचौबे च सुललितगायनं कृतवन्तौ। मयङ्ककुमारः भक्तः तबलावाद्येन सङ्गतिं कृतवान्। रामअचलयादवः अस्य सत्रस्य सञ्चालनं कृतवान्।

## आयोजन-समित्या कार्तज्ञ्यम्-

अस्य भव्य- आयोजनस्य संयोजकेन डॉ. विमलेन्दु कुमार त्रिपाठिना विहितम्। कोषाध्यक्षः मिथिलेश कुमारः, सहसंयोजकौ भुवन भास्करः डॉ. शम्भू तिवारी च आसन्। आयोजनसमित्यां डॉ. सञ्जय सिंहः, मृत्युञ्जय मिश्रः इत्यादयः प्रमुखाः सदस्याः सक्रियाः आसन्। प्रथमसत्रस्य धन्यवादज्ञापनं बालेन्दुशेखरत्रिपाठिना (गिरिडीह महाविद्यालयः) कृतम्, द्वितीयसत्रस्य च मृत्युञ्जयमिश्रमहोदयेन विहितम्। न केवलं झारखण्डात् अपि तु विविधप्रान्तेभ्यः महामनापरिवाराच्च विद्वांसः कार्यकर्तारश्च समुपस्थिताः आसन्। यथा- डॉ. सञ्जय कुमार चौबे, डॉ. सत्येन्द्र पाण्डेयः, डॉ. कौशलेन्द्र त्रिपाठी, डॉ. मनीषचन्द्र पाण्डेयः, हृदयानन्द द्विवेदी, रजनीकान्त उपाध्याय, डॉ. चन्द्रमौलीश्वर पाण्डेयः, डॉ. चिन्तामणि त्रिपाठी, डॉ. आशीषकुमाररायः, डॉ पारङ्गतखल्खो, डॉ. दीपककुमारसिंहः, डॉ. द्रविड़, डॉ. शशिकान्तपाण्डेयः, डॉ. पायलवर्मा, डॉ. सुनीताकुमारी, डॉ. विनीता तिर्की, राकेश पाठकः, डॉ. शनिकुमारचौबे, राजीवमिश्रः प्रभृतयः नैके जनाः।

# कण्वनगरीकोटद्वारे 'मुष्टियुद्ध-महाकुम्भः' रिङ्गे युवमुष्टियुद्धवीराणां शौर्यप्रहारैः अष्टमी राज्यस्तरीया मुष्टियुद्ध-प्रतियोगिता प्रादुर्भूता



**हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला, कोटद्वारम्।** कण्वनगर्यां पावनधरण्यां उत्तराखण्ड-राज्य- क्रीडाविभागस्य, उत्तराखण्ड-मुष्टियुद्ध-संघस्य समन्वयेन, जिलाक्रीडाधिकारी जयवीररावत महोदयस्य, स्थलक्रीडाप्रभारी श्यामसिंहडांगी महोदयस्य मार्गदर्शनेन अद्य मुष्टियुद्धवीराणां संकल्प- ऊर्जाभिः समग्रं वातावरणं गुंजायमानं जातम्। दुर्गापुरीस्थले अष्टमी राज्यस्तरीया कनिष्ठा (अन्तरायुः–१७) बालक- बालिका- मुष्टियुद्ध-प्रतियोगिता अत्यन्तं भव्यतया आरब्धा, या देवभूमेः क्रीडाकौशलाय नूतनं मञ्चं प्रदत्तवती। २७ तः २९ दिसम्बरपर्यन्तं प्रवर्तमानायां अस्याम् प्रतियोगितायां राज्यस्य विविधजनपदेभ्यः आगताः प्रतिभावन्तः मुष्टियुद्धकाः स्वप्रहारबलं चपलतां च प्रदर्शयन्ति।

## माननीया विधानसभाध्यक्षया विजयशङ्खनादः कृतः

प्रतियोगितायाः विधिवत् उद्घाटनं उत्तराखण्ड-विधानसभायाः प्रथम-महिला-अध्यक्षया माननीयया ऋतु खण्डूरीभूषण-महाभागया कृतम्। सा मातृसरस्वत्याः पुरतः दीपप्रज्वलनं कृत्वा आयोजनस्य गरिमां वर्धितवती। ततः विविधजनपदेभ्यः आगतानां क्रीडकेभ्यः, विद्यालयीयछात्रेभ्यः (बालभारती एवं नवयुग- पब्लिक- विद्यालययोः) भव्यस्य सछात्रपथसंचलनस्य निरीक्षणं कृत्वा संचलनसम्मानं स्वीकृतवती। सा अवदत्- "एषा रिङ्गः केवलं जयपराजयस्य क्षेत्रं नास्ति, अपि तु उत्तराखण्डस्य भाविनाम् ओलम्पिक-तारकाणां निर्माणस्य आधारशिला अस्ति।"

## रिङ्गे स्पन्दनम्- *प्रथमे दिने एव क्रीडकैः पराक्रमः प्रदर्शितः*

प्रतियोगितायाः प्रथमे दिने एव द्विषष्टि (६२) द्वन्द्वयुद्धे लक्ष्येन क्रीडकैः रिङ्गे स्वेदः विसृष्टः। त्रयोदश भारवर्गेषु मुष्टियुद्धकानां मध्ये तकनीककौशलस्य शारीरिकक्षमतायाश्च तीव्रा स्पर्धा दृष्टा। बालकवर्गे (४४–४६ कि.ग्रा.) उद्घाटनस्पर्धायां देहरादूनदलस्य मुष्टियुद्धकेन पिथौरागढ़दलस्य विरुद्धं तकनीकीश्रेष्ठतया विजयः प्राप्तः।

बालिकावर्गस्य प्रथमे एव चक्रे चम्पावतजनपदस्य क्रीडिकया पौड़ीजनपदस्य क्रीडिकां पराजित्य स्वदलस्य विजयलेखं उद्घाटितम्। कोटद्वार- आवासस्य क्रीडकैः स्वगृहक्रीडाभूमौ उत्कृष्टकार्यविजयः सम्पाद्य स्वोत्तरदायित्वं सुदृढीकृता। अद्य सम्पन्नेषु एकविंशतिः (२१) प्रथमपूर्वान्त्यचक्रे, पञ्चदश (१५) द्वितीयपूर्वान्त्यचक्रे देहरादूनं, कोटद्वारं, पिथौरागढ़ः, पौड़ी, टनकपुरं, उधमसिंहनगरं, काशीपुरं इत्यतेषां च जनपदानां वीराः मुष्टियुद्धकाः अग्रिमचरणं प्रति प्रस्थिताः।

अस्यां मुष्टियुद्ध- महाकुम्भप्रतियोगितायां अतिथिरूपेण प्रेमाखन्तवालवर्या (पार्षदः पदमपुरं), सुनीतादेवी (महिला- जिला अध्यक्षा, अनुसूचितमोर्चा, भाजपा), इन्दुखन्तवालवर्या (पार्षदः बालासौडः), किरणकाला (पार्षदः मानपुरं), सिमरनबिष्टः (अध्यक्षा महिला-भाभरमण्डलं, कोटद्वारम्), आशीषरावतः (अध्यक्षः भाभरमण्डलकोटद्वारं), गिरिराजसिंहरावतः (प्रधानाचार्यः, बालभारती पब्लिकविद्यालयः), गोपालसिंहखोलिया (महासचिवः, उत्तराखण्ड-मुष्टियुद्धसंघः), डी. सी. भट्टः (अन्ताराष्ट्रीय- प्रशिक्षकः), देवेन्द्रसिंह जीना (अन्ताराष्ट्रीय- मुष्टियुद्धनिर्णायकः), जोगेन्द्रसिंहबोरा (अन्ताराष्ट्रीय- निर्णायकः), सुनील रावतः (अन्ताराष्ट्रीय- पादकन्दुक- प्रशिक्षकः), जयवीर रावतः (जिला- क्रीडाधिकारी), कै. देवीचन्दः (पूर्व- एशियन- रजतपदकविजेता, दक्षिण- एशियन- स्वर्णपदकविजेता), प्रजापति कुकरेती (प्रशासनिक-अधिकारी), रितेश अधिकारी (अध्यक्षः, जिला- मुष्टियुद्धसंघः, पौड़ी), जयदीप नौटियालः (उपाध्यक्षः), जगत राणा (कोषाध्यक्षः), कमलसिंहनेगी (सचिवः एवं विधायक-प्रतिनिधिः), अमित नेगी (सहसचिवः), आनन्दनेगी धीरेन्द्रसिंह कण्डारी च (वरिष्ठक्रीडाप्रेमिणौ), विनोद पन्तः, सिद्धार्थ रावतः च अन्ये बहवः क्रीडाजगतः दिग्गजाः उपस्थिताः आसन्।

क्रीडकानां मनोबलवर्धनार्थं अन्ताराष्ट्रिय-स्तरस्य विभूतयः अपि उपस्थिताः। एतैः सह जिला क्रीडाधिकारी जयवीर रावतः, क्रीडास्थलप्रभारी श्यामसिंहडांगीमहोदयः, क्षेत्रस्य प्रमुखाः जनप्रतिनिधयः आगत्य क्रीडकानां उज्ज्वल- भविष्याय शुभाशिषः प्राददुः। प्रतियोगितायाः मीडियाप्रभारी शिवमनेगीमहोदयेन सूचितं यत् आगामिद्विदिनयोः पूर्वान्त्यचक्रस्य च अन्त्यचक्रस्य क्रीडाः अत्यन्तं रोमाञ्चकाः भविष्यन्ति, येषु प्रदेशस्य श्रेष्ठानां कनिष्ठमुष्टियुद्धकानां चयनं भविष्यति।

# राष्ट्रीय-रक्षा-विश्वविद्यालयेन ओलम्पिकवादं संवर्धयितुं त्रयः वृहत् उपक्रमाः उद्घोषिताः




**हिमसंस्कृतवार्ताः अंशुगुप्ता - गांधीनगरम्।** अहमदाबादस्थितः राष्ट्रिय-रक्षाविश्वविद्यालयः रविवासरे ओलम्पिकवादस्य प्रवर्धनार्थं त्रयः प्रमुखाः उपक्रमाः उद्घोषितवान्। विश्वविद्यालयेन घोषितं यत् सः सन् 2029 मध्ये आयोज्यमानानां विश्व- पुलिस- अग्निशमन- क्रीडानां विविधविधायाः आतिथ्यं करिष्यति। राष्ट्रिय-रक्षा-विश्वविद्यालयेन अद्य अहमदाबादनगरे कर्णावतीक्लब इत्यत्र आयोजिते आभासिमाध्यमसंवादे एतां सूचनां प्रदत्तम्। अस्मिन् कार्यक्रमे गुजराते भारतवर्षे च ओलम्पिकवादस्य, क्रीडा-संस्कृतेः प्रवर्धनार्थं सम्बद्धाः महत्त्वपूर्णाः उपक्रमाः उद्घोषिताः। कार्यक्रमस्य अध्यक्षतां विश्वविद्यालयस्य कुलपतिः प्रो. (डॉ.) बिमल एन. पटेलः अकुर्वत्।अस्मिन् अवसरे विश्वविद्यालयस्य अधिकारिणः भारत- ओलम्पिक- अनुसन्धान- शिक्षाकेन्द्रस्य गतिविधीनाम् आगामी-योजनानां विवरणं दत्त्वा अवदन् यत् राष्ट्रिय- रक्षाविश्वविद्यालयः सन् 2029 मध्ये आयोज्यमानानां विश्व- पुलिस एवम् अग्निशमनक्रीडानाम् अष्टक्रीडाविधायाः आतिथ्यं करिष्यति। एषा भारतस्य कृते अस्मिन् अन्ताराष्ट्रिय- स्तरीय-आयोजने प्रथमा सहभागिता भविष्यति। तदर्थं विशेष-आयोजन-व्यवस्था, प्रशिक्षितस्वयंसेवकानां दलम्, अत्याधुनिकाः क्रीडासुविधाश्च विकसिताः क्रियन्ते।

अनेन सह सन 2026 तमस्य जनवरीमासस्य 27तः 30 दिनाङ्कपर्यन्तं गांधीनगरनगरे अन्ताराष्ट्रिय- ओलम्पिक- अनुसन्धानसम्मेलनस्य आयोजनं भविष्यति। अस्मिन् सम्मेलने देशविदेशानां क्रीडाविशेषज्ञाः, शोधकर्तारः, प्रशासकाः सहभागितां करिष्यन्ति। सम्मेलनकाले क्रीडाशिक्षा, क्रीडाप्रशासनं निष्पक्ष- क्रीडासम्बद्धेषु विषयेषु विचारविमर्शः भविष्यति, राष्ट्रीय- डोपिंग- निरोधकसंस्थया सह डोपिंगविरोधीकार्यशाला अपि आयोजिता भविष्यति।

माध्यमान् प्रति अपि अवगतं कारितं यत् सन् 2026 जनवरीमासस्य 10 दिनाङ्के गांधीनगरनगरे 'नाइट रन' इति क्रीडाकार्यक्रमस्य आयोजनं भविष्यति। अस्मिन् आयोजने सामान्य-नागरिकाः, सुरक्षाबलसदस्याः, दिव्याङ्गक्रीडकाश्च सहभागितां करिष्यन्ति। अस्य आयोजनस्य उद्देश्यं स्वास्थ्यं, सुरक्षा, ओलम्पिकमूल्यानां प्रति जन-जागरूकतायाः वर्धनम् अस्ति।

कुलपतिः प्रो. (डॉ.) बिमल एन. पटेलः अवदत् यत् एताः सर्वाः उपक्रमाः भारतवर्षे क्रीडासंस्कृतेः सुदृढीकरणं करिष्यन्ति। गुजरातम् अन्ताराष्ट्रिय- क्रीडा- आयोजनानां प्रमुखकेन्द्ररूपेण स्थापयितुं महत्तां सिद्ध्यन्ति।

# २०२६ संवत्वर्षस्य भविष्यवाण्यः- उत्तराखण्ड- ज्योतिषरत्नेन आचार्येण डॉ. चण्डीप्रसाद-घिल्डियाल-दैवज्ञेन प्रकाशिताः



## सम्पूर्णस्य विश्वस्य कृते परिवर्तनात्मकः वर्षः न तु भयावहः

हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला, देहरादूनम्।
उत्तराखण्ड- ज्योतिषरत्नः आचार्यः डॉ. चण्डीप्रसादः घिल्डियालः दैवज्ञः अवदत्- संवत्सरः २०२६ भयावहः न भविष्यति, किन्तु सम्पूर्णस्य विश्वस्य कृते परिवर्तनात्मकः वर्षः भविष्यति। अस्मिन्नेव वर्षे भारतस्य प्रधानमन्त्री नरेन्द्रमोदीमहोदयस्य नोबेलपुरस्कारप्राप्तये वैश्विकस्तरे अनुकूलभूमिकां निर्मातुं शक्यते इति अपि तेन सूचितम्।
केचन ज्योतिर्विदः संवत्सरं २०२६ अतिभयङ्करं भविष्यतीति प्रचारयन्ति, तद्विषये दैवज्ञः स्पष्टं कृतवान् यत्- परिवर्तनकाले समाजे अज्ञातभयः जायते, किन्तु कालक्रमेण समाजः तं परिवर्तनं स्वीकुर्वन् सन्तुलितः भवति। ज्योतिषीयदृष्ट्या अन्तर्राष्ट्रीयजगतः आर्थिकं, सामाजिकं, राजनैतिकं, प्रशासकीयम्, न्यायिकं, प्राकृतिकं च व्यापारिकं परिदृश्यं सम्यक् विवेच्य व्याख्यातम्।

## आर्थिकं परिदृश्यम्-

वैश्विके अर्थतन्त्रे महत् उच्चावचः न भविष्यति, अपि तु स्थिरः सुरक्षितः च विकासः अपेक्षितः। अन्ताराष्ट्रीय-मुद्राकोषः (IMF) "गोल्डमैन- सैक्सशोधन" इत्यनया संस्थया अनुमानं कृतं यत् वैश्विकविकासदरः प्रायः ३.५ प्रतिशतं भविष्यति। भारतदेशः २०२६ संवत्सरे प्रायः ७.५ प्रतिशत- जीडीपी इत्यनया वृद्ध्या विश्वस्य शीघ्रतमे विकसिते प्रमुख-अर्थतन्त्रेषु अग्रणी स्थानं धारयिष्यति। तथापि भूराजनैतिक-अनिश्चितता, व्यापारविघ्नाः, मुद्रास्फीतिनियन्त्रणं च प्रमुखाः आर्थिकसचैतन्याः भविष्यन्ति।

## तकनीकि-सामाजिक-परिवर्तनम्-

विज्ञानवेदान्तयोः गभीरं ज्ञानं धारयन् आचार्यः दैवज्ञः कथयति- कृत्रिमबुद्धिमत्ता (AI) जीवनस्य सर्वासु दिशासु अधिकं प्रभावं करिष्यति। सामग्रीनिर्माणात् आरभ्य ग्राहकसेवापर्यन्तं AI प्रयोगः वर्धिष्यते, मानवीयनियन्त्रणस्य न्यूनता अपि दृश्यते। सामाजिकमाध्यमेषु लघुदृश्याः उपयोक्तृ-निर्मितसामग्री (UGC), प्रामाणिकता अधिकं महत्त्वं प्राप्स्यन्ति। निजसमुदायेषु अन्तर्जालतकनीकी जगति च आभासी/ वर्धित- वास्तविकता (VR/AR) अधिकं प्रचलिष्यति।

## स्वास्थ्य-जागरूकता-

नारीस्वास्थ्यविषयेषु, यथा रक्तगुणसूत्रे- असन्तुलनं, प्रजननस्वास्थ्यं च, विशेषं ध्यानं दास्यते, समये परीक्षणस्य आवश्यकता अपि प्रतिपाद्यते। राजनैतिक-पर्यावरणीय- दौर्बल्यं भूराजनैतिक- अस्थिरता, प्राचीनविश्वव्यवस्थातः नवीनव्यवस्थायाः संक्रमणं च निरन्तरं भविष्यति, यस्मिन् अमेरिका- चीनादीनां महाशक्तीनां मध्ये चिन्ता सम्भवति। जलवायुपरिवर्तनं, जैवविविधताक्षयः, सामूहिकविनाश- अस्त्राणि, सैन्यनिर्णयेषु AI प्रयोगश्च- एते २०२६ संवत्सरे मानवतायाः समक्षं महत्तराः समस्याः भविष्यन्ति। गुरुग्रहस्य गत्या राजनीतौ प्रशासनं च अस्थिरता- अवसरयोः सम्भावना वर्तते, अतः धैर्यविवेकयोः विशेषावश्यकता भविष्यति।
दैवज्ञस्य मतानुसारं २०२६ संवत्सरः परिवर्तनकारी भविष्यति- यत्र तान्त्रिकप्रगतिः, आर्थिकस्थैर्यस्य अवसराः च सन्ति, किन्तु वैश्विकसंचेतनेषु सजगता अत्यावश्यकोऽपि भविष्यति।
ज्योतिषवैज्ञानिकः डॉ. दैवज्ञः वदति- गुरुग्रहस्य प्रभावात् आपणे, राजनीतौ, सामान्य-जीवने च महत्त्वपूर्णाः निर्णयाः, नेतृत्वपरिवर्तनं, प्रशासकीयकठोरता च सम्भवति।
उच्चपदस्थव्यक्तीनां प्रभावः वर्धिष्यते। २०२६ संवत्सरः परिवर्तनस्य वर्षं भविष्यति- पुरातनाः शक्तयः पराजिताः भविष्यन्ति, नवीनाः शक्तयः उद्भविष्यन्ति। सूर्यचन्द्रयोः संयुक्तप्रभावेन देशस्य यशः वर्धिष्यते, सेनायाः शौर्यं च दृढं भविष्यति। मूलाङ्क- १, ३, ५, ६, ८ धारकाणां कृते २०२६ संवत्सरः विशेषतः शुभः भविष्यति।
अनेकैः राष्ट्रीय- अन्ताराष्ट्रीयसम्मानैः विभूषितः आचार्यः डॉ. चण्डीप्रसादः घिल्डियालः दैवज्ञः अवदत्- अस्मिन् वर्षे प्रधानमन्त्री नरेन्द्रमोदीमहोदयस्य नोबेलपुरस्कारप्रदानाय वैश्विकधरातले अनुकूलतां निर्मातुं शक्यते। तथापि २०२६ संवत्सरः प्राकृतिक आपदां दृष्ट्या समस्यापूर्णः अपि भविष्यति। भूकम्पाः, अतिवृष्टिः, ज्वालामुखिविस्फोटाः इत्यादयः सम्भाव्याः सन्ति, अतः केन्द्र-राज्यसर्वकारैः सतर्कता अवश्यं धारणीया।

# राज्यस्तरीय-युवामहोत्सवाय केसीईसंस्थायाः स्वामीविवेकनन्दः कनिष्ठमहाविद्यालयस्य द्वयोः प्राध्यापकयोः नाशिक विभागीय-संघ-व्यवस्थापकत्वे नियुक्तिः


प्रा. प्रसाद-देसाई


प्रा. (श्रीमती) मयुरी-हरिमकर

**हिमसंस्कृतवार्ताः अर्जुनशास्त्री, जलगावः(महाराष्ट्र-राज्यम्)।** भारतसर्वकारस्य युवा-कार्यक्रम-क्रीडा-मन्त्रालयेन आयोजिते राज्यस्तरीय-युवामहोत्सवे (२०२५–२६) नाशिक-विभागस्य संघ-व्यवस्थापकपदाय जलगाव-स्थित-स्वामीविवेकानन्द-कनिष्ठमहाविद्यालयस्य द्वयोः प्राध्यापकयोः नियुक्तिः कृता अस्ति। अयं राज्यस्तरीयः युवामहोत्सवः दिनाङ्के २९ दिसम्बर २०२५ तः ०१ जनवरी २०२६ पर्यन्तम् ग.दि. माण्डगुळकर-नाट्यगृहे, पिंपरी–चिंचवड-महानगरपालिकायां, निगडी–पुणे इत्यत्र आयोजयिष्यते। अस्य महोत्सवस्य कृते महाविद्यालयस्य प्रा. प्रसाद-देसाई तथा प्रा. (श्रीमती) मयुरी-हरिमकर इत्येतयोः नाशिक-विभागीय-संघ-व्यवस्थापकत्वेन नियुक्तिः कृतेति धुळे-जनपदस्य जिल्हा-क्रीडा-अधिकारी श्री. मनोहर-पाटील इत्यनेन सूचितम्। युवामहोत्सवस्य मुख्योद्देश्यः युवानां सर्वाङ्गीण-विकासः, भारतीय-सांस्कृतिक-परम्पराणां संरक्षणम्, युवजनानां सुप्त-कलागुणानां विकासः तथा राष्ट्रीय-एकात्मतायाः संवर्धनं च अस्ति। अस्य महत्त्वपूर्णस्य उत्तरदायित्वस्य कृते स्वामीविवेकानन्द-कनिष्ठमहाविद्यालयस्य प्राध्यापकयोः चयनं महाविद्यालयस्य गौरवकारणं इति अभिप्रायः व्यक्तः भवति। अस्याः नियुक्तेः अवसरः के.सी.ई. संस्थायाः अध्यक्षः प्रज्ञावन्तः श्री. नन्दकुमार-बेण्डाळे, प्राचार्यः डॉ. सं. ना. भारम्बे, उपप्राचार्यः श्री. आर. बी. ठाकरे, पर्यवेक्षिका सौ. स्वाती-बऱ्हाटे, समन्वयकः श्री. उमेश-पाटील च प्रा. देसाई तथा प्रा. हरिमकर इत्येतयोः हार्दिकम् अभिनन्दनं कृत्वा तयोः भावी-कार्याय शुभाशयाः प्रेषितवन्तः।

**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

# वार्ता-संवादः

नन्दिनी: नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
काव्या: नमस्ते नन्दिनि। अद्य प्रकृति-प्रेमिभ्यः आनन्दस्य विषयः वर्तते। वैज्ञानिकैः सप्तति-सङ्ख्यकाः नूतनाः जीवजातयः अन्विष्टाः। तासु पुरातनाः भीमसरटाः तथा च विचित्राः कीटाः अपि दृष्टाः।
नन्दिनी: अहो! भीमसरटाः तु अतिविशालाः आसन्। एतत् श्रुत्वा कुतूहलं जातम्। इदानीं मस्तिष्क-विषयकं शोधकार्यं श्रूयताम्। वैज्ञानिकैः मस्तिष्कस्य अन्तः स्थिताः रक्षक-कोशिकाः दृष्टाः। ताभिः एव मनसः उद्वेगः आरब्धः स्थगितः च।
काव्या: अहो! मस्तिष्कस्य रहस्यम् अद्भुतं खलु। मनसः उद्वेगः कोशिकाभिः नियन्त्रितः इति आश्चर्यम्। अधुना भूमौ प्राङ्गार-सञ्चयनस्य विषयः श्रूयताम्। वैज्ञानिकैः इदं ज्ञातम् यत् लौह-खनिजैः प्राङ्गार-तत्त्वं कथं शतशः वर्षाणि गुप्तरूपेण स्थापितं भवति इति।
नन्दिनी: लौह-खनिजैः प्राङ्गारः बद्धः इति तु शुभं वृत्तम्। इदानीं शरीर-विज्ञानस्य एका गम्भीरा वार्ता प्राप्ता। शोधकर्तृभिः ज्ञातं यत् मधुमेहेन मानव-हृदयस्य रचना एव परिवर्तिता। तैः मधुमेहात् जायमानस्य हृदय-विकारस्य नूतनानि कारणानि अन्विष्टानि।